# पार्वतीकृत स्तोत्र

गौर्युवाच ।

गजानन ज्ञानविहारकारिन् न मां च जानासि परावमर्शाम् ।
गणेश रक्षस्व न चेच्छरीरं त्यजामि सद्यस्त्वयि भक्तियुक्ता ।।१।।

विघ्नस्य शत्रोऽसुरसंघहंतर्विघ्नेश हेरंब महोदरप्रिय ।
मां रक्ष दैत्यात्त्वयि भक्तियुक्तां लंबोदर प्रेमविवर्धनाच्युत ।।२।।

किं सिद्धिबुद्धिप्रसरेण मोहयुक्तोऽसि किं वा निशि निद्रितोऽसि ।
किं लक्षलाभार्थविचारयुक्तः किं मां च विस्मृत्य सुसंस्थितोऽसि ।।३।।

किं भक्तसंगेन च देवदेव नानोपचारैश्च सुयंत्रितोऽसि ।
किं मोदकाद्यैर्गणपाऽऽवृतोऽसि नानाविहारेषु च वक्रतुंड ।।४।।

स्वानंदभोगेषु परिप्लुतोऽसि दासीं च विस्मृत्य महानुभाव ।
अनंतलीलासु सलालसोऽसि किं भक्तरक्षार्थसुसंकटस्थ ।।५।।

अहो गणेशामृतपानदक्षामरैस्तथा वाऽसुरपैः स्मृतोऽसि ।
तदर्थनानाविधिसंयुतोऽसि विसृज्य दासीं त्वमनन्यभावाम् ।।६।।

रक्षस्व मां दीनतमां परेश सर्वत्र चित्तेषु च संस्थितस्त्वम् ।
प्रभो विलंबेन विनायकोऽसि ब्रह्मेश किं देव नमो नमस्ते ।।७।।

भक्ताभिमानीति च नाम मुख्यं वेदे बभूवात्र न किं महात्मन् ।
आगत्य हत्वा दितिजं सुरेश मां रक्ष दासीं हृदि पादनिष्ठाम् ।।८।।

अहो न दूरं बत किंचिदेव कथं न बुद्धीश समागतोऽसि ।
संचिंत्य देहं प्रजहामि ते हि यशः करिष्ये विपरीतमेव ।।९।।

रक्ष, रक्ष दयासिंधोऽपराधान् मे क्षमस्व च ।
क्षणे क्षणे वयं दास्यो रक्षितव्या विशेषतः ।।१०।।